## अस्तिसिचोऽपृक्ते । (९६/२२२५)

अस्तेरङ्गात् सिजन्ताच्च [1]परस्य अपृक्तस्य सार्वधातुकस्य ईडागमो भवति । अस्तेः – आसीत् । आसीः । सिजन्तात् – अकार्षीत् । असावीत् । अलावीत् । अपावीत् । अपृक्ते इति किम् ? अस्ति । [2]अकार्षम् । आहिभुवोरीटि प्रतिषेधः[3] इति स्थानिवद्भाव[4]प्रतिषेधः, तेनेह [5]न भवति, आत्थ, अभूत् इति ॥

## बहुलं छन्दसि । (९७/३५८६)

अस्तिसिचोरपृक्तस्य[6] सार्वधातुकस्य ईडागमो भवति बहुलं छन्दसि विषये । [7]आप एवेदं सलिलं सर्वमाः । आसीदिति स्थाने आः क्रियापदम् । 'अहर्वाव तर्ह्यासीन्न रात्रिः' (मै. १.५.१२) । सिचः खल्वपि – 'गोभिरक्षाः' (ऋ. ९.१०७.९) । 'प्रत्यञ्चमत्साः' (ऋ. १०. २८. ४) । अभैषीर्मा पुत्रक इति च भवति, छान्दसत्वात् । माङ्योगेऽपि अडागमो[8] भवति, अक्षाः, अत्साः इति, सिच [9]इडभावश्च ॥

## रुदश्च पञ्चभ्यः । (९८/२४७७)

रुदादिभ्यः[10] परस्य [11]सार्वधातुकस्य हलादेः अपृक्तस्य ईडागमो भवपि । अरोदीत् । अरोदीः । अस्वपीत् । अस्वपीः । अश्वसीत् । अश्वसीः । प्राणीत् । प्राणीः । अजक्षीत् । अजक्षीः । पञ्चभ्यः इति किम् ? अजागर्भवान् । अपृक्तस्य इत्येव, रोदिति[12] ॥

## अड् गार्ग्यगालवयोः । (९९/२४७६)

रुदादिभ्यः पञ्चभ्यः परस्य अपृक्तस्य सार्वधातुकस्य अडागमो भवति गार्ग्यगालवयो[13]र्मतेन । अरोदत् । अरोदः । अस्वपत् । अस्वपः । अश्वसत् । अश्वसः । प्राणत् । प्राणः । अजक्षत् । अजक्षः । गार्ग्य–गालवयोर्ग्रहणं पूजार्थम् ॥

## अदः सर्वेषाम् । (१००/२४२६)

'[14]अद भक्षणे' (धा.पा. १०१२), अस्मादुत्तरस्य अपृक्तस्य सार्वधातुकस्य अडागमो भवति सर्वेषामाचार्याणां मतेन । आदत् । आदः । अपृक्तस्य इत्येव, अत्ति । अत्सि[15] ॥

---

1. परस्य नास्ति क. 2. अकार्ष्टम् क. 3. वक्तव्यः इत्यधिकम् क. 4. निषेधात् क. 5. इट् न भवति क. 6. हलः इत्यधिकम् क. 7. आप एवेदं सर्वमाहरेत्येवमासीत् क. 8. भवति नास्ति क. 9. इडागमाभावः क. 10. पञ्चभ्यः इत्यधिकम् क. ड. इ. ह. 11. सार्वधातुकस्य नास्ति क. 12. स्वपिति इत्यधिकम् ह. 13. आचार्ययोः इत्यधिकम् क. इ. ह 14. अदोऽङ्गात् इ. 15. सर्वेषां ग्रहणं विकल्पशङ्का–निवृत्त्यर्थम् इत्यधिकम् क.